International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2022; 8(6): 05-09
© 2022 IJSR
www.anantaajournal.com
Received: 08-08-2022
Accepted: 12-09-2022

**डॉ. सुनेली देई**
सहायिका आचार्या, संस्कृतविभागः,
गङ्गाधरमेहेरविश्वविद्यालयः,
सम्बलपुरम्, उडीसा, भारत

Corresponding Author:
**डॉ. सुनेली देई**
सहायिका आचार्या, संस्कृतविभागः,
गङ्गाधरमेहेरविश्वविद्यालयः,
सम्बलपुरम्, उडीसा, भारत

# कृष्णकेशवषडङ्गिनः समुद्रशतकम् : एकमध्ययनम्

**डॉ. सुनेली देई**

**सारांश**

२०२० खीष्टाब्दे उत्कलीयकविना ड. कृष्णकेशवषडङ्गिना विरचितं समुद्रशतककाव्यं क्रमेण एकं लघुकाव्यं शतककाव्यं गीतिकाव्यञ्च भवति । काव्येऽस्मिन् आत्मपरिचयात्मकेन पुष्पिकाश्लोकद्वयेन सह १०१ श्लोकाः सन्ति । उत्कलीयकविः ड. कृष्णकेशवषडङ्गी १९७८ खीष्टाब्दे जुन् मासस्य अष्टादशदिनाङ्के कटकमण्डलस्य वैदेश्वरग्रामे जन्मग्रहणमकरोत् । तस्य पितुः नाम प्रवक्तारत्नः स्वर्गतः पण्डितः जयदेवः षडङ्गी मातुः नाम च श्रीमती मनोजमञ्जरी षडङ्गी । कविः कृष्णकेशवः षडङ्गी सम्प्रति कटकमण्डलस्य वाङ्कीनामके स्थाने सर्वकाराधीनस्थ-ब्लक्-पशुरोगचिकित्सा-अधीकारीभावेन कार्यं करोति । कविः ड. कृष्णकेशवषडङ्गी स्वर्गतः रघुनाथषडङ्गी- स्वर्गतः जयदेवषडङ्गी-स्वर्गतः प्रफेसर् दोलगोविन्दशास्त्री-प्रफेसर् गोपीनाथमहापात्रः-पण्डितप्रबोधकुमार-मिश्रमहाभागेभ्यः संस्कृतविषये शिक्षालाभं कृतवान् । कविः ड. कृष्णकेशवषडङ्गी अद्यावधि चतुर्द्दशग्रन्थान् रचितवान् ।

समुद्रशतककाव्यस्य मुख्यरसः शान्तरसः भवति । काव्यस्य प्रारम्भे आशीर्वादात्मकमङ्गलाचरणं दृश्यते । काव्येऽस्मिन् पौराणिक-प्राकृतिककथातत्त्वमाश्रित्य समुद्रस्य निन्दाप्रशंसे उभे वर्णिते । अत्र कविना उपजाति-वंशस्थविलं-वसन्ततिलका-शिखरिणी-मालिनी-स्रग्धरा-पृथ्वी-शार्दूलविक्रीडितादि- छन्दांसि प्रयुज्य श्लोकाः निर्मिताः । काव्येऽस्मिन् श्लोकैः सह तेषामन्वयाः उत्कलार्थाः आंग्लोभाषा-हिन्दीभाषाभ्यामनूदितार्थाः च प्रदत्ताः । अन्योक्ति-अर्थान्तरन्यासाद्यलङ्कारमाध्यमेन कविना समाजस्य मानवेभ्यः बहवः सुशिक्षाः प्रदत्ताः ।

**कूटशब्दः** सालङ्कारमिदं समुद्रशतकम्, रसमयम्, कृष्णकेशवकवेरेषा कृतिः

## प्रस्तावना

**वर्णनीयविषयवस्तुः** अस्य शोधपत्रस्य मुख्यवर्णनीयविषयवस्तु भवति समुद्रशतककाव्यस्य रचयितुः ड. कृष्णकेशवषडङ्गिनः परिचयप्रदानपुरः सरं समुद्रशतककाव्यस्य कथावस्तुवैशिष्ट्यादीनां प्रतिपादनम्।

**उपक्रमः**

समुद्रशतकम् क्रमेण एकं लघुकाव्यं शतककाव्यं गीतिकाव्यञ्च भवति । समुद्रशतककाव्यस्य रचयिता भवति उत्कलीयकविः ड. कृष्णकेशवषडङ्गी । काव्यस्य अन्ते पुष्पिकायां २०२० खीष्टाब्दे वैशाखमासे शुक्लपक्षे अक्षयतृतीयाम् रसमयं सालङ्कारमिदं समुद्रशतककाव्यं कविना ड. कृष्णकेशवषडङ्गिना विरचितमिति सूचितमस्ति । तथा हि—

खीष्टाब्देऽम्बरपक्षखेक्षणमिते शुक्ले तृतीयातिथौ
वैशाखे रविवासरे शुभतरे सम्पूर्णमेव प्रगे ।
सालङ्कारमिदं समुद्रशतकं कारुण्यसिन्धोः कृपा-
कल्लोलैः परिशोधितं रसमयं तृप्त्यै सतां भासताम् ।।[1]

**कवेः जन्मस्थानं समयश्च**

समुद्रशतककाव्यस्य रचयिता उत्कलीयकविः ड. कृष्णकेशवषडङ्गी १९७८ खीष्टाब्दे जुन् मासस्य अष्टादशदिनाङ्के कटकमण्डलस्य वैदेश्वरग्रामे जन्मग्रहणमकरोत् । तस्य पितुः नाम प्रवक्तारत्नः स्वर्गतः पण्डितः जयदेवः षडङ्गी मातुः नाम च श्रीमती मनोजमञ्जरी षडङ्गी । कविः कृष्णकेशवः षडङ्गी सम्प्रति कटकमण्डलस्य वाङ्कीनामके स्थाने सर्वकाराधीनस्थ-ब्लक्-पशुरोगचिकित्सा-अधीकारीभावेन कार्यं करोति । कविः ड. कृष्णकेशवषडङ्गी स्वर्गतः रघुनाथषडङ्गी- स्वर्गतः जयदेवषडङ्गी- स्वर्गतः प्रफेसर् दोलगोविन्दशास्त्री- प्रफेसर् गोपीनाथमहापात्रः- पण्डितप्रबोधकुमार- मिश्रमहाभागेभ्यः संस्कृतविषये शिक्षालाभं कृतवान् ।[2]

**कवेः कृतयः**

कविः ड. कृष्णकेशवषडङ्गी चतुर्दशग्रन्थान् रचितवान् । १) श्रीशिवताण्डवस्तोत्रस्य संस्कृत-ओडिआभाषयोः अनुवादः (खी. १९९६), २) पण्डित नीलमणिविद्यारत्ननक्षत्रमाला (खी. १९९८)- एकः काव्यग्रन्थः, ३) पुण्यश्लोकप्रशस्तिका (खी. १९९९) एकः काव्यग्रन्थः, ४) श्रीजगन्नाथस्तुतिमन्दाकिनी (खी. २०००) श्रीजगन्नाथाष्टकस्य ओडिआ-अनुवादग्रन्थः, ५) तपस्विनी (खी. २००१) संस्कृतपद्यानुवादग्रन्थः, ६) जीमूतदूतम् (खी. २००२) एकं खण्डकाव्यम् , ७) नीलाद्रिचम्पूः (खी. २००३) एकं चम्पूकाव्यम् , ८) गङ्गाधरार्धः (खी. २०१०) अर्घ्यथालि इति ओडिआकाव्यग्रन्थस्य संस्कृतानुवादः , ९) मेघदूतम् (खी. २०१३) ओडिआ-अनुवादग्रन्थः, १०) नीलाद्रीश-चतुस्त्रिंशिका (खी. २०१७) नीलाद्रीश चउतिशा इति ओडिआकाव्यस्य संस्कृतपद्यानुवादः ११) अंशुपाविलास (खी. २०१८) ओडिआ-काव्यग्रन्थः, १२) रथेशशतकम् (खी. २०२०) एकं शतककाव्यम् , १३) समुद्रशतकम् (खी. २०२०) एकं शतककाव्यम्, १४) हनुमच्चत्वारिंशिका (खी. २०२१) हनुमान् चालिशायाः संस्कृतपद्यानुवादः ।

**समुद्रशतकस्य विषयवस्तु**

समुद्रकूलः सर्वेभ्यः रोचते । तस्य समुद्रस्योपरि विरचितस्य अस्य समुद्रशतककाव्यस्य प्रारम्भे कविना तीर्थराजः जलधिः सर्वेषां कृते मङ्गलदायकः भवतु इति आशीर्वादात्मकमङ्गलाचरणं क्रियते । काव्येऽस्मिन् कविः सर्वेषु श्लोकेषु समुद्रं सम्बोध्य सकलवृत्तान्तं वर्णयति ।

**समुद्रस्य स्वरूपम्**

समुद्रस्य स्वरूपं पूर्णरूपेण कविना प्रकाशितमत्र । समुद्रः अगाधजलधारी, गुरुगम्भीरगर्जनकारी सकलनदीजलपानकारी उत्तुङ्गतरङ्गमालाशोभी श्यामलवर्णधारी चास्ति ।

**समुद्रेण सह संश्लिष्टानि पौराणिकमाख्यानानि**

समुद्रमन्थनसमये समुद्राद् ऐरावतहस्ती, उच्चैःश्रवा अश्वः, दक्षिणावर्त्तशङ्खः, कौस्तुभमणिः, शार्ङ्गधनुः, हलाहलविषम्, अमृतम्, देवाङ्गना, चन्द्रः, पारिजातवृक्षः, लक्ष्मीः, मद्यम्,

---

[1] समुद्रशतकम्, पुष्पिका-१

[2] कवेः जीवनवृत्तान्तविषये यदुल्लिखितमस्ति, तत्सर्वं कविनैव उक्तम् ।

धन्वन्तरी, कामधेनुश्चेति चतुर्द्दशरत्नानाम् निर्गतादेतेषां चतुर्द्दशरत्नानां प्रभवस्थलं समुद्र इति कथ्यते ।[3]

पुराणानुसारं भगवान् विष्णुः क्षीरसमुद्रे शेषनागस्य उपरि शयनरतः दृश्यते । पौराणिकी कथेयं कविना काव्येऽस्मिन् सुष्ठु वर्णिता ।[4]

अगस्तिमुनिः समुद्रस्य गर्वखण्डनार्थं समुद्रं चलुं कृत्वा पीतवान् इति पुराणप्रसिद्धिरस्ति ।[5]

**समुद्रस्य दोषाः गुणाश्च**

समुद्रस्य दोषविषये सूचयित्वा कविनोक्तं यत् समुद्रस्य जलं लवणाक्तत्वात् कस्यापि तृषानिवारणं कर्त्तं समुद्रः समर्थः भवति नापि कोऽपि जनः समुद्रे सम्पूर्णस्नानं कर्त्तुं समर्थः भवति ।[6] अपि च सर्वासां नदीनां मधुरं जलमपि समुद्रस्य लवणाक्तजलसंस्पर्शेण आगत्य लवणाक्तं सत् पानस्य अयोग्यं भवति ।[7] परन्तु लवणं विना व्यञ्जनं स्वादिष्टं न भवति । अतः समुद्रः लवणदानेन मानवानां जिह्वालालसां चरितार्थं करोति ।

समुद्रस्य गुणविषये सूचयित्वा कविः कथयति यत् समुद्रमन्थनसमये समुद्रः देवासुरैः मन्थनेन पीडितः अभवत् । परन्तु प्रतिदानेन समुद्रः सर्वेषामुपकारं कृतवान् । समुद्रात् निर्गतम् अमृतं देवाः पीतवन्तः, लक्ष्मीं विष्णुः गृहीतवान् , चन्द्रः सर्वान् आह्लादितवान् ।[8] रावणः सीतामपहृतवान् । परन्तु निर्द्दोषोऽपि समुद्रः सेतुवन्धेन वन्दी अभवत् । सर्वेषामुपकारकस्त्वं नितरां वडवानलेन दग्धीभूतः भवसि । समुद्रः स्वस्य सर्वाणि रत्नानि सर्वेभ्यः देवादिभ्यः प्रदत्तवान्, स्वयं तु लवणाक्तं जलमात्रं धृत्वा वडवानलेन सन्तप्तः सन् तिष्ठति । अयं तु भवति समुद्रस्य वदान्यता ।

[3] समुद्रशतकम्-३

[4] तत्रैव-४

[5] तत्रैव-६

[6] समुद्रशतकम्-१०

[7] तत्रैव-१२

[8] समुद्रशतकम्-५

**नीतिशिक्षाः**

अन्योक्ति-अर्थान्तरन्यासाद्यलङ्कारमाध्यमेन कविना समाजस्य मानवेभ्यः बहवः सुशिक्षाः प्रदत्ताः । अधः केचन श्लोकाः उदाहरणरूपेण प्रदीयन्ते—

**दग्धस्त्वं वडवानलेन महतां कष्टं भृशं सर्वथा । (समुद्र-६)** अर्थात्,सज्जनाः सदैव सर्वत्र परोपकारार्थं महान्तं कष्टं स्वीकुर्वन्ति।

**हर्षोऽन्योन्नतिदर्शनेन नितरां रीतिः सतामीदृशी । (समुद्र-७)** अर्थात्, अन्यस्य उन्नतिं दृष्ट्वा सज्जनाः आनन्दिताः भवन्ति ।

**रे निर्लज सरित्पते पदमदाद् गर्जस्यहो किं मुधा, पीतस्त्वं मुनिना यदा चुलुकवत् क्वासीत्पदं ते वद । (समुद्र.-११)** श्लोकेऽस्मिन् कविनोक्तं यत् यः समुद्रः स्वस्य अगाधजलकारणात् गर्वान्वितः सन् गर्जनं कृतवान्, तं समुद्रं अगस्तिमुनिः यदा चलुं कृतवान्, तदा तस्य सकलः अहङ्कारः चूर्णीभूतः जातः । अस्मात् इयं शिक्षा ते यत् उच्चपदासीनेन जनेन (केनापि जनेन) कदापि गर्वः न करणीयः ।

**जामाता ग्रहवद्धरिः पुनरयं त्वद्वेश्म हन्तागतः । (समुद्र.-९)** साम्प्रतिकसमाजे जामातरः अत्यधिकः लोभासक्तः सन् श्वशुरगृहात् अधिकाधिकं धनमाहर्त्तुमिच्छन्ति, तस्मिन् विषये श्लोकोऽयं सूचयित्वा परधनं प्रति लोभः न करणीयः इत्युपदिशति।

**शेते सोऽत्र मुराररित्यनुदिनं प्रीत्या भजामोऽम्बुधे**

लक्ष्मीरत्नसुधाशशाङ्कपयसां भव्यं निधिं त्वामिह ।
जानीमः कथमेव वा त्वदुदरं दुर्वारलीलानटत्-
पाठीनैर्विकटैस्तिमिङ्गलकुलैर्भीमाहिभिर्भीषणम्।।
(समुद्र.-१४)

अर्थात्, हे अम्बुधे तव उदरे नारायणः शयनं करोति, त्वं लक्ष्मी-कौस्तुभमणि-अमृत-चन्द्र-जलादीनां धारकोऽसि इति विषये वयं

जानीमः । परन्तु एतद् वयं न जानीमः यत् त्वं तिमिङ्गिल-मत्स्य-सर्पादीनां भयङ्करहिंस्रजन्तूनां धारकोऽपि असि ।

बाह्यतः समुद्रस्य शोभा यद्यपि अतीव रमणीया दृश्यते, तथापि समुद्रस्य अन्तः भयङ्करजीवजन्तुभिः परिपूर्णत्वात् अतीव भीतिप्रदायकोऽस्ति । श्लोकेऽस्मिन् कविः समुद्रस्य दोषप्रख्यापनछलेन दुर्जनस्य स्वभावविषये आलोकपातं करोति । समुद्रस्य सदृशम् आपाततः सज्जनप्रतीयमानस्य दुर्जनस्य हृदयमतीव भयङ्करं भवतीति कविना सूचितमत्र ।

## कवेः शुभाशंसा

समुद्रः सर्वेषां कृते मङ्गलदायी भवतु इति कवेः कामना मङ्गलाचरणश्लोकात् स्पष्टं परिज्ञायते । तथा हि-

गम्भीरनादकुतुकी त्वमुदारकायः
प्रोत्तुङ्गभङ्गविलसल्लहरीनिकायः ।
गङ्गादिसर्वतटिनीरससारपायी
हे तीर्थराज जलधे भव भद्रदायी ।।

१.८ समुद्रशतकस्य वैशिष्ट्यम्

समुद्रशतककाव्यस्य मुख्यरसः शान्तरसः भवति । काव्येऽस्मिन् पौराणिक-प्राकृतिककथातत्त्वमाश्रित्य समुद्रस्य निन्दाप्रशंसे उभे वर्णिते । अत्र कविना उपजाति-वंशस्थविलं-वसन्ततिलका-शिखरिणी-मालिनी-स्रग्धरा-पृथ्वी-शार्दूलविक्रीडितादिछन्दांसि प्रयुज्य श्लोकाः निर्मिताः । काव्येऽस्मिन् श्लोकैः सह तेषामन्वयाः उत्कलार्थाः आंग्लोभाषा-हिन्दीभाषाभ्यामनूदितार्थाः च प्रदत्ताः । काव्यस्य प्रारम्भे समुद्रे विष्णोः अनन्तशयनस्य तथा समुद्रमन्थनस्य फटोचित्रद्वयं प्रदीयते । काव्येऽस्मिन् समुद्रस्य तीर्थराजः [9] जलधिः [10] अम्बुनाथः [11] उदधिः [12] सलिलधिः [13] पाथोनिधिः [14] सिन्धुः [15] अप्पतिः [16] अम्भोधिः [17] अम्बुधिः [18] सरित्पतिः [19] अम्बुनिधिः [20] अर्णवः [21] अब्धिः [22] उदधिः [23] वारिधिः [24] जलनिधिः [25] पयोनिधिः [26] तोयधिः [27] रत्नाकरः [28] समुद्रः[29] उदनाथः[30] पाथोधिः[31] वारीशः[32] वार्धिः[33] अपां निधिः[34] सलिलेश[35] जलनाथः[36] वारां निधिः[37] इति ऊनत्रिंशत्संख्याकानां पर्यायवाचकनाम्नां प्रयोगः दृश्यते ।

## उपसंहारः

प्रथितयशसः उत्कलीयकवेः कृष्णकेशवषडङ्गिनः समुद्रशतकम् एकम् उच्चकोटीरकाव्यम् । काव्येऽस्मिन् बहवः समाजस्य हितकारकाः नीतिशिक्षाः उपलभ्यन्ते । अस्य काव्यस्य अन्यदेकं

---

9 तत्रैव-१
10 तत्रैव-१
11 तत्रैव-३
12 तत्रैव-४
13 तत्रैव-५
14 तत्रैव-६
15 तत्रैव-७
16 तत्रैव-८
17 तत्रैव-९
18 तत्रैव-१०
19 तत्रैव-११
20 तत्रैव-१२
21 तत्रैव-१३
22 तत्रैव-२२
23 तत्रैव-२३
24 तत्रैव-२४
25 तत्रैव-३०
26 तत्रैव-३१
27 तत्रैव-३४
28 तत्रैव-३६
29 तत्रैव-४७
30 तत्रैव-४९
31 तत्रैव-५०
32 तत्रैव-६१
33 तत्रैव-७६
34 तत्रैव-८०
35 तत्रैव-८३
36 तत्रैव-९७
37 तत्रैव-९८

विलक्षणं यदत्र समुद्रस्य पूर्णस्वरूपमुद्घाटितमस्ति । पुनश्च काव्येऽस्मिन् कविः प्रत्येकश्लोके समुद्रं तस्य विविधैः पर्यायवाचकशब्दैः सम्बोध्य समुद्रस्य दोषगुणादीनां वर्णनं करोति। अपि चात्र पुराणेषु समुद्रविषये यानि यानि पौराणिकाख्यानानि दृश्यन्ते, तानि सर्वाणि कविना स्वप्रतिभया श्लोकैः रूपान्तरीतानि। किं बहुना ? समुद्रशतकमिदं कवेः प्रतिभायाः भावनायाश्च ज्वलन्तं निदर्शनमस्ति ।

## सहायकग्रन्थसूची

१. नायकः, केतकी, अलङ्कारशास्त्रस्येतिहासः, साम्बिदीप्रकाशनम्, पुरी, १९९७

२. शास्त्री, शालग्रामः, साहित्यदर्पणः, मोतिलालबनारसीदासः, वाराणसी, १९८६

३. षडङ्गी, कृष्णकेशवः, समुद्रशतकम्, भुवनेश्वर-भञ्जभारती, भुवनेश्वरम्,ओडिशा, २०२०